श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ चित्रपद्धतिः त्रिंशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ चित्रपद्धतिः त्रिंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

प्रतिष्ठां सर्वचित्राणां प्रपद्ये मणिपादुकाम्।
विचित्रजगदाधारो विष्णुर्यत्र प्रतिष्ठितः॥ ३०.१ ॥

शृणु ते पादुके ! चित्रं चित्राभिर्मणिभिर्विभोः।
युगक्रमभुवो वर्णान् युगपद्वहसे स्वयम्॥ ३०.२ ॥

सुरासुरार्चिता धन्या तुङ्गमङ्गळपालिका।
चराचराश्रिता मान्या रङ्गपुङ्गवपादुका॥ ३०.३ ॥

पद्मेव मङ्गळसरित्पारं संसारसन्ततेः।
दुरितक्षेपिका भूयात् पादुका रङ्गभूपतेः॥ ३०.४ ॥

अनन्यशरणः सीदन्ननन्तक्लेशसागरे।
शरणं चरणत्राणं रङ्गनाथस्य संश्रये॥ ३०.५ ॥

प्रतिभायाः परं तत्त्वं बिभ्रती पद्मलोचनम्।
पश्चिमायामवस्थायां पादुके ! मुह्यतो मम॥ ३०.६ ॥

यामः श्रयति यां धत्ते येन यात्याय याच्च या।
याऽस्य मानाय ये वान्या सा मामवतु पादुका॥ ३०.७ ॥

चर्या नः शौरिपादु ! त्वं प्रायश्चित्तेष्वनुत्तमा।
निवेश्यसे ततः सद्भिः प्रायश्चित्तेष्वनुत्तमा॥ ३०.८ ॥

रामपादगता भासा सा भाता गदपामरा।
कादुपानञ्च कासह्या ह्यास काञ्चनपादुका॥ ३०.९ ॥

बाढाघाळीझाटतुच्छे गाथाभानाय फुल्लखे।
समाधौ शठजिच्चूडां वृणोषि हरिपादुके !॥ ३०.१० ॥

सा भूपा रामपारस्था विभूपास्तिसपारता।
तारपा सकृपा दुष्टिपूरपा रामपादुका॥ ३०.११ ॥

कारिका न न यात्राया या गेयाऽस्यस्य भानुभा।
पादपा हह सिद्धासि यज्ञाय मम साऽञ्जसा॥ ३०.१२ ॥

सराघवा श्रुतौ दृष्टा पादुका सनृपासना।
सलाघवा गतौ श्लिष्टा स्वादुर्मे सदुपासना॥ ३०.१३ ॥

काव्यायास्थित मावर्गव्याजयातगमार्गका।
कामदा जगतः स्थित्यै रङ्गपुङ्गवपादुका॥ ३०.१४ ॥

सुरकार्यकरी देवी रङ्गधुर्यस्य पादुका।
कामदा कलितादेशा चरन्ती साधुवर्त्मसु॥ ३०.१५ ॥

भरताराधितां तारां वन्दे राघवपादुकाम्।
भवतापाधितान्तानां वन्द्यां राजीवमेदुराम्॥ ३०.१६ ॥

कादुपास्यसदालोका कालोदाहृतदामका।
कामदाऽध्वरिरंसाकाऽकासा रङ्गेशपादुका॥ ३०.१७ ॥

पापाकूपारपाळीपा त्रिपादीपादपादपा।
कृपारूपा जपालापा स्वापा माऽपान्नृपाधिपा॥ ३०.१८ ॥

स्थिरागसां सदाराध्या विहताकततामता।
सत्पादुके ! सरासा मा रङ्गराजपदं नय॥ ३०.१९ ॥

स्थिता समयराजत्पा गतारा मादके गवि।
दुरंहसां सन्नतादा साध्यातापकरासरा॥ ३०.२० ॥

लोकताराकामचारा कविराजदुरावचा।
तारा गते पादराऽऽम राजते रामपादुका॥ ३०.२१ ॥

जयामपापामयाजयामहे दुदुहे मया।
महेशकाकाशहेमपादुकाऽममकादुपा॥ ३०.२२ ॥

पापादपापादपापाऽपादपाददपादपा।
दपादपा पादपाद पादपाद दपादपा॥ ३०.२३ ॥

कोपोद्दीपकपापेऽपि कृपापाकोपपादिका।
पूदपादोदकापादोद्दीपिका काऽपि पादुका॥ ३०.२४ ॥

ततातत्ता तितत्तेता तातत्तीतेतितातितुत्।
तत्तत्तत्तातततितता ततेतातेततातुता॥ ३०.२५ ॥

यायायायायायायाया यायायायायायायाया।
यायायायायायायाया या या या या या या या या॥ ३०.२६ ॥

रघुपतिचरणावनी तदा विरचितसञ्चरणा वनीपथे।
कृतपरिचरणा वनीपकैर्निगममुखैश्च रणावनीगता॥ ३०.२७ ॥

दत्तकेळिं जगत्कल्पनानाटिका-
    रङ्गिणा रङ्गिणा रङ्गिणा रङ्गिणा।
तादृशे गाधिपुत्राध्वरे त्वां विना
    ऽपादुका पादुका पादुका पादुका॥ ३०.२८ ॥

पादपापादपापादपापादपा पादपापादपापादपाऽपादपा।
पादपापादपापादपापादपापादपापादपापाऽऽदपापादपा॥ ३०.२९ ॥

साकेतत्राणवेळाजनितततनिजप्राङ्कणश्रीप्रभासा
    साभा प्रश्रीरटव्यामियमममयमिव्यापदुच्छेदिलासा।
सालादिच्छेदतिग्माहवरुरुरुवह ह्रीकरस्यामरासा-
    ऽसा रामस्याङ्घ्रिमभ्याजति न न नतिजस्थूलमुत्रातके सा॥ ३०.३० ॥

रम्ये वेश्मनि पापराक्षसभिदास्वासक्तधीनायिका
नन्तुं कर्मजदुर्मदालसधियां सा हन्त नाथीकृता।
सद्वाटभ्रमिकासु तापसतपोविस्रम्भभूयन्त्रिका
काचित्स्वैरगमेन केळिसमये कामव्रता पादुका॥ ३०.३१ ॥

श्रीसंवेदनकर्मकृद्वसु तव स्यामृद्धधैर्यस्फुटः
श्रीपादावनि विस्तृतासि सुखिनी त्वं गेययातायना।
वेदान्तानुभवातिपातिसुतनुः सान्द्रेड्यभावप्रथे-
ऽङ्कस्था चाच्युतदिव्यदास्यसुमतिः प्राणस्थसीताधन !॥ ३०.३२ ॥

कनकपीठनिविष्टतनुस्तदा सुमतिदायिनिजानुभवस्मृता।
विधिशिवप्रमुखैरभिवन्दिता विजयते रघुपुङ्गवपादुका॥ ३०.३३ ॥

दीनगोपीजनिक्लिष्टभीनुत् सदा
रामपादावनि ! स्वानुभावस्थिता।
एधि मेऽवश्यमुत्तारभावश्रिता
तेजसा तेन घुष्टिं गता पालिका॥ ३०.३४ ॥

धामनिराकृततामसलोका धातृमुखैर्विनता निजदासैः।
पापमशेषमपाकुरुषे मे पादु ! विभूषितराघवपादा॥ ३०.३५ ॥

कृपानघत्रातसुभूरदुष्टा
मेध्या रुचा पारिषदामभूपा।
पादावनि ! स्त्यानसुखैर्न तृप्ता
कान्त्या समेताधिकृताऽनिरोधा॥ ३०.३६ ॥

सारससौख्यसमेता ख्याता पदपा भुवि स्वाज्ञा।
साहसकार्यवनाशा धीरा वसुदा नवन्यासा॥ ३०.३७ ॥

सान्याऽवनदा सुवराऽधीशाना वर्यका सहसा।
ज्ञा स्वा विभुपादपताख्याता मे सख्यसौ सरसा॥ ३०.३८ ॥

तारस्फारतरस्वररसभररा सा पदावनी सारा।
धीरस्वैरचरस्थिररघुपुरवासरतिरामसवा॥ ३०.३९ ॥

चरमचरं च नियन्तुश्चरणावनिदम्परेतरा शौरेः।
चरमपुरुषार्थचित्रौ चरणावनि ! दिशसि चत्वरेषु सताम्॥ ३०.४० ॥

॥ इति श्रीपादुकासहस्रे चित्रपद्धतिः त्रिंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥